# **<u>संस्कृत वार्ताः</u>**

दिनाङ्कः 07/10/2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- आर्थिककार्याणां प्रमुखमन्त्रिसभया सार्धचतुर्विंशतिसहस्राधिक-कोटिरूप्यकाणां चतुर्णां रेल्-परियोजनानाम् अनुमोदनं कृतम्, एताः परियोजनाः महाराष्ट्र-मध्यप्रदेश-गुजरात-छत्तीसगढप्रदेशानां अष्टादशजनपदेषु व्याप्ताः भविष्यन्ति।
- प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रसेवायाः पञ्चविंशतितमे वर्षे प्रवेशं कुर्वन्, विकसितभारतस्य सामूहिकं स्वप्नं साकारं कर्तुं परिश्रमं करिष्यतीति प्रतिज्ञामकरोत्।
- रक्षामन्त्री राजनाथसिंहः एकोनत्रिंशदधिकद्विसहस्रतमवर्षपर्यन्तं त्रिलक्ष-कोटिरूप्यकाणां रक्षोत्पादनस्य लक्ष्यम् अवलम्बयत्।
- अमेरिकादेशस्य जान्-क्लार्क्, मैकेल्-डेवोरेट्, जान्-मार्टिनिस् इत्येते त्रयः वैज्ञानिकाः अस्य वर्षस्य भौतिकशास्त्रस्य नोबेल्-पुरस्कारं प्राप्तवन्तः।
- महिलानां ओ. डि. आई. विश्वकप-क्रिकेट-इति क्रीडायां इङ्ग्लैण्ड्-बाङ्ग्लादेश-देशयोर्मध्ये गुवाहाटी-नगरे क्रीडा प्रचलति।

अथ वार्ता: विस्तरेण

कैबिनेट निर्णयः

आर्थिकविषयिक-मन्त्रिपरिषद-समित्या सार्धचतुर्विंशतिसहस्रतोऽधिक कोटिरूप्यकाणां चतुर्णां रेल-परियोजनानां अनुमोदनम् कृतम्। अद्य नवदेहल्यां मन्त्रिमण्डलस्य निर्णयानन्तरं प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनीवैष्णवः परियोजनायाः विषये अधिकविवरणानि च प्राददात्।

मन्त्रिणा उक्तं यत्, एते प्रकल्पाः महाराष्ट्रस्य, मध्यप्रदेशस्य, गुजरातस्य, छत्तीसगढस्य च अष्टादश जनपदानाम् आवरणं करिष्यन्ति, येन भारतीयरेलमार्गस्य विद्यमानजालस्य विस्तारः प्रायः षड्नवशत- किलोमीटरं यावत् भविष्यति। श्रीवैष्णवः अवदत् यत्, वर्धित-मार्ग-क्षमतया गतिशीलतायां महती वृद्धिः भविष्यति, यस्याः परिणामेन भारतीय-रेल-संस्थायाः परिचालनक्षमतायां, सेवा-विश्वसनीयतायाञ्च वृद्धिः भविष्यतीति।

प्रधानमन्त्री-25 वर्षाणि

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् गतैकादश- वर्षेषु देशे उल्लेखनीयानि परिवर्तनानि अभवन्। सः अवदत् यत्, पथप्रवर्तक-उपक्रमाः सम्पूर्णे देशे महिलानां, यूनां, कृषकाणां च सशक्तीकरणं कृतवन्तः, पञ्चविंशतिकोट्यधिकाः जनाः दारिद्र्यात् मोचिताश्च। प्रधानमन्त्री नरेन्द्रमोदी सर्वकारस्य प्रमुखत्वेन राज्य-राष्ट्रसेवयो: पञ्चविंशतितमे वर्षे प्रवेशं कुर्वन् एतानि वक्तव्यानि अयच्छत्। जनान् प्रति कृतज्ञतां प्रकटयन् श्रीमोदी अवदत् यत्, भारतं वैश्विक-अर्थव्यवस्थायां उज्ज्वलस्थानरूपेण वर्तते। सामाजिक-प्रसारमाध्यमे सः अवदत् यत्, देशे प्रमुखाः स्वास्थ्यसेवाः, सामाजिक-सुरक्षा-योजनाश्च सन्ति। सः सूचितवान् यत् सर्वकारेण विस्तृतानि परिष्काराणि स्वीकृतानि सन्ति अथ च सर्वक्षेत्रेषु भारतम् आत्मनिर्भरं कर्तुं जनभावना अस्ति च, या हि "गर्व से कहो, ये स्वदेशी है" इत्यस्य स्पष्टम् आह्वानम् प्रतिबिम्बयति।

राजनाथ-रक्षा क्षेत्रम्

एकोनत्रिंशदुत्तरद्विसहस्रतम- वर्षपर्यन्तं त्रि-लक्ष-कोटिरूप्यकाणां रक्षोत्पादनानि समुत्पाद्य पञ्चाशत् सहस्र-कोटिरूप्यकाणां रक्षा-निर्यातस्य च लक्ष्यं साधयितुं सर्वकारेण निर्धारितमस्ति। रक्षामंत्री राजनाथसिंहः अद्य नवदेहल्ल्यां रक्षा-विनिर्माणक्षेत्रे अवसराणां विषये वार्ताहरसम्मेलनं सम्बोधयन् एतदुक्तवान्। श्रीसिंहः अवधानं दत्तवान् यत् रक्षा-निर्यातोऽपि चतुर्विंशति- सहस्रकोटि-रूप्यकाणि अतिक्रमयदिति।

श्रीसिङ्हः महत्त्वपूर्णरक्षा-क्षमतासु उच्चस्तरस्य स्वावलंबनस्य आवश्यकतायाः विषये अवधानं ददन् राष्ट्रम् स्वतन्त्रतायाः शततमवर्षपर्यन्तं विकसित्-भारतस्य लक्ष्येन अग्रे गमिष्यतीति उक्तवान्।

विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः www.newsonair.gov.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल ऐप इत्यत्र अपि उपलब्धो भविष्यति।

नोबेल्-फिसिक्स्ः

संयुक्तराज्यामेरिकादेशस्य त्रयः वैज्ञानिकाः चिप् इत्यस्य उपयोगेन क्वाण्टम इति भौतिकशास्त्रस्य क्रियायाः प्रदर्शनस्य अभूतपूर्व-प्रयोगेभ्यः अस्य वर्षस्य नोबेल इति पुरस्कारं प्राप्तवन्तः। तेषां कार्येण क्वाण्टम्-सङ्गणकानां, क्वाण्टम्-संवेदकानां, क्वाण्टम्-क्रिप्टोग्राफ़ी इत्यस्य च प्रगतिः साधिता। पुरस्कारविजेतारः जान् क्लार्क्, मिशेल् डेवोरेट्, जान् मार्टिनिस् च क्यालिफोर्निया-विश्वविद्यालयेन, येल्-विश्वविद्यालयेन च सम्बद्धाः सन्ति।

जयशङ्करः ए. आई.

विदेशमन्त्री डा. एस. जयशङ्करः अवदत् यत् आर्टिफिसियल इन्टेलिजेन्स इत्यस्य कार्यान्वयनात्प्राक् विश्वासः सुरक्षा च आवश्यकमस्तीति। अद्य नवदेहल्यां ट्रस्ट् एण्ड सेफ़्टी फ़ेस्टिवल इण्डिया इत्येतं कार्यक्रमं सम्बोधयन् डा. जयशङ्करः अवदत् यत्, आगामिषु वर्षेषु ए आई इति कृत्रिमबुद्धिमत्ता अर्थव्यवस्थां परिवर्तयिष्यति, कार्य-पद्धतिं परिवर्तयिष्यति, नूतनान् स्वास्थ्योपायाञ्च कल्पयिष्यतीति। मन्त्रिणा इत्यपि उक्तं यत् जीवनशैल्यां ए आई इत्यस्य समावेशेन विश्वस्य प्रत्येकस्य नागरिकस्य जीवनं प्रभावितं भविष्यति।

वाल्मीकि जयन्तिः

अद्य देशस्य विभिन्नेषु भागेषु वाल्मीकिजयन्त्युत्सवः समाचर्यते। अयं दिवसः आदिलौकिककाव्यग्रन्थस्य रामायणस्य रचयितुः महर्षि-वाल्मीकिपादस्य जन्मोत्सवः अस्ति। महर्षि वाल्मीकिः 'आदि-कविः' संस्कृतभाषायाः प्रथमः कविः इत्यभिधिया च पूज्यते। वाल्मीकि-सम्प्रदायस्य सदस्याः अपि तं ईश्वरस्य दूतरूपेण पूजयन्ति, महद्भक्त्या च प्रगट-दिवसमिमम् आचरन्ति। अस्य अवसरस्य स्मारकत्वेन शोभायात्राः अपि निष्काष्यन्ते। अवसरेऽस्मिन् प्रधानमन्त्रिणा नरेन्द्रमोदिना

देशवासीभ्यः शुभाशयाः सन्ति प्रेषिताः। सामाजिक-प्रसार-माध्यमे प्रधानमन्त्री अवदत् यत्, महर्षि-वाल्मीकि-वर्यस्य शुद्धादर्शानाञ्च विचाराणां प्राचीनकालादेव भारतीयसमाजस्य परिवाराणाञ्चोपरि गहनः प्रभावः अस्ति। श्रीमोदी इत्यपि अवदत् यत्, महर्षि-वाल्मीकि-वर्यस्य, सामाजिक-सौहार्दस्य आधारेण निर्मितः परिकल्पनात्मकः दीपस्तम्भः नागरिकाणां जीवनं सर्वदा प्रकाशयिष्यतीति।

राष्ट्रपतिः/सशस्त्रबलानि

राष्ट्रपतिः द्रौपदी मुर्मूः उक्तवती यत् आपरेशन् सिन्दूर् इत्यस्य समये देशस्य सशस्त्रसेनाः संयुक्ततायाः सामरिक-दूरदृष्टेः च प्रदर्शनम् अकुर्वन्। सा अवोचत् यत् क्रमबद्धं, त्रि-सेवाप्रतिक्रियायाः परिणामेन प्रभावपूर्णं समन्वयं जातम्, येन नियन्त्रणरेखायाः पारं आतङ्कवादस्य आधारिकसंरचना विक्षिप्ता जाता। अद्य राष्ट्रपतिभवने पञ्चषष्टितमे राष्ट्रिय-रक्षा-महाविद्यालयस्य पाठ्यक्रमस्य अध्यापकेभ्यः पाठ्यक्रमस्य सदस्येभ्यश्च सम्बोधयन्ती राष्ट्रपतिः मुर्मु वर्या एतत् उक्तवती।

एन्. डी. आर्. एफ्. केन्द्रम्

केन्द्रप्रशासनेन अग्निसुरक्षायाः विस्तारणाय आधुनिकीकरणाय च राष्ट्रिय-विपद्-प्रतिक्रिया-कोषान्तर्गतं हरियाणा-मध्यप्रदेश-राजस्थान-राज्येभ्यः त्र्युत्तरनवशत- कोटिरूप्यकाणि अनुमोदितानि। केन्द्रीय-गृह-मन्त्रिणः अमितशाहस्य अध्यक्षतायाम् उच्च-स्तरीय-समितिः साहाय्यस्य अनुमोदनम् अकरोत्। आहत्य सप्तदशोत्तरैकशत- कोटिरूप्यकाणि हरियाणा-राज्याय, त्रिलक्षोनचतुर्कोटिरूप्यकाणि मध्यप्रदेशाय, अष्टाशीत्यधिकत्रिशत- कोटिरूप्यकाणि राजस्थानाय च अनुमोदितानि सन्ति। समितिः एन.डी. आर. एफ. इति दलपक्षतः गतवर्षे जलप्लावनेन भूस्खलनेन च प्रभाविताभ्यां असम -गुजरात-राज्याभ्यां सप्तोत्तरसप्तशत- कोटिरूप्यकाणां अतिरिक्त-केन्द्रीय-साहाय्यस्यापि अनुमोदनम् अकरोत्।

ऋतुवार्ताः

भारतस्य ऋतु-विभागेन अद्य हिमाचलप्रदेशे, उत्तराखण्डे, रायलसीमायां, तमिल्नाडु-राज्ये, पुदुचेरी-राज्ये, करैकल्-क्षेत्रे, भारतस्य पूर्वोत्तरराज्येषु च प्रचण्डतोऽधिकवृष्टिः भविष्यतीति पूर्वानुमानं कृतम् अस्ति। विभागेनानेन दिल्ली, उत्तराखण्ड, चण्डीगढ, हिमाचलप्रदेश, पञ्जाब, हरियाणा इत्येतेषु प्रदेशेष्वपि विद्युल्लतापुरस्सरं, वायुवेगेन च सह वर्षया तापमाने अपचितिः भविष्यति।

## महिलानां क्रीकेट्क्रीडा

महिलानां एकदिवसीयायां विश्वकप-क्रिकेट इति क्रीडायां, बाङ्ग्लादेशः किञ्चित्कालपूर्वं गुवाहाटी-नगरे इङ्ग्लेण्ड-देशं विरुध्य ओवराख्ये पञ्चत्रिंशत्कन्दुकक्षेपचक्रेषु पञ्चस्तोभानां पतनपुरस्सरं चतुर्दशोत्तरैकशत धावनाङ्कान् समर्जयत।

## जूडो जूनियर वर्ल्ड्ः

अद्य पेरू-देशस्य लिमा-नगरे जूडो-जूनियर-वर्ल्ड-चैम्पियन्शिप्-क्रीडायां भारतस्य प्रथमं पदकं विजित्य जूडो-क्रीडिका लिन्थोय् चनम्बम् इत्येषा इतिहासं निर्मितवती।

।।इति वार्ता:।।